शृणु—समे देशे शर्करावह्निवालुकाशब्दजलाशयादिवर्जिते मनोऽनुकूले शुचौ नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं स्थिरमासनं प्रतिष्ठाप्य तत्रोपविश्यासनं स्वस्तिकादि बद्ध्वा समं कायशिरोग्रीवं धारयन्नचलं विश्वादीन् विश्वतैजसप्राज्ञान् जाग्रत्स्वप्नसुषुप्तिक्रमेण कार्यकारणविनिर्मुक्ते पूर्णात्मनि उपसंहृत्य पूर्णात्मना स्थित्वा ध्यायेत्पुरिशयं देवं पूर्णानन्दं निरञ्जनम् अपूर्वानपरं ब्रह्म नेतिनेत्यादिलक्षणम् अशनायाद्यसंस्पृष्टमनुदितानस्तमितज्ञानात्मनावस्थितं परं परमात्मानमोमिति । तथा चोक्तं ब्रह्मविद्भिः—

*समाधान*—सुनो, जो कंकड़, अग्नि, बालू, शब्द और जलाशय आदिसे रहित हो, मनके अनुकूल हो एवं पवित्र हो ऐसी समान भूमिमें, जो न बहुत ऊँचा हो और न बहुत नीचा—ऐसा उत्तरोत्तर कुशा, मृगचर्म और वस्त्रका स्थिर आसन बिछाकर उसपर बैठकर अथवा स्वस्तिक या पद्मासन लगाकर शरीर, सिर और ग्रीवाको समान रखते हुए, विश्वादि—विश्व, तैजस और प्राज्ञ—को जाग्रत्, स्वप्न और सुषुप्तिके क्रमसे कार्यकारणशून्य पूर्ण परमात्मामें लीनकर, पूर्णरूपसे स्थित हो, हृदयदेशमें स्थित पूर्णानन्दस्वरूप, निर्मल, आदि-अन्तरहित, नेति-नेति इत्यादि क्रमसे लक्षित होनेवाले, क्षुधादि विकारोंसे असंस्पृष्ट तथा कभी उदित और अस्त न होनेवाले ज्ञानस्वरूपसे स्थित परब्रह्म परमात्माका 'ॐ' इस प्रकार ध्यान करे । ऐसा ब्रह्मवेत्ताओंने कहा भी

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



विविक्तदेशमाश्रित्य ब्राह्मणः शुद्धचेतसा ।
भावयेत्पूर्णमाकाशं हृद्याकाशाश्रयं विभुम् ॥
तथा चोक्तं ब्रह्माण्डपुराणे कावषेयगीतासु—
तस्माद्विमोक्षाय कुरु प्रयत्नं
दुःखाद्विमुक्तो भवितासि येन।
ॐ ब्रह्म शून्यं परमं प्रधान
मानन्दमात्रं प्रणवं जुषस्व ॥इति॥

एवं युञ्जन् सदाऽऽत्मानं परमात्मत्वेन यदा साक्षाद्विजानाति तदा निरस्ताज्ञानतत्कार्यो वीतशोकः कृतकृत्यो भवति । तथा च बृहदारण्यके—'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिच्छन्कस्य कामाय शरीरमनु संज्वरेत् ॥ इति । तथा च ईशावास्ये—'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥' इति । तथा च कठवल्लीपु—

तं दुर्दर्शं गूढमनुप्रविष्टं
गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं
मत्वा धीरो हर्षशोकौ जहाति ॥

'निचाय्य तं मृत्युमुखात्प्रमुच्यते,' 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन' इति । 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥'

तथा चाह भगवान्—
अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ।
ति । तथा च कावषेयगीतासु—
आत्मज्ञः शोकसंतीर्णो न बिभेति कुतश्चन ।
मृत्योः सकाशान्मरणादथवान्यकृताद्भयात् ॥

है कि 'ब्राह्मणको चाहिये कि एकान्त देशमें रहकर शुद्धचित्तसे अपने हृदयाकाशमें स्थित व्यापक पूर्णाकाशका चिन्तन करे ।' तथा ब्रह्माण्डपुराणान्तर्गत कावषेयगीतामें भी कहा है—'अतः तू मोक्षके लिये प्रयत्न कर, जिससे कि तू दुःखसे मुक्त हो जायगा । ॐ, जो शून्यस्वरूप, सर्वोत्कृष्ट, प्रधान और आनन्दमात्र ब्रह्म है, उस प्रणवका तू सेवन कर ।'

इस प्रकार योगाभ्यास करते हुए जब वह अपने सत्स्वरूप आत्माको साक्षात् परमात्मभावसे जानता है, तब वह अज्ञान और उसके कार्यसे रहित होकर निःशोक और कृतकृत्य हो जाता है । ऐसा ही बृहदारण्यकमें कहा है—'यदि पुरुष अपने-आपको यह जान ले कि मैं यह [ ब्रह्म ] ही हूँ तो वह क्या इच्छा करके अथवा किस कामनासे अपनेको अनुतप्त करेगा ?' तथा ईशावास्यमें कहा है—'जिस स्थितिमें ज्ञानीके लिये सम्पूर्ण भूत आत्मा ही हो जाते हैं, उस अवस्थामें एकत्वका अनुभव करनेवाले उस पुरुषके लिये क्या मोह और क्या शोक रह सकता है ?' इसी तरह कठवल्लियोंमें भी कहा है—'अत्यन्त कठिनतासे दिखायी देनेवाले, गूढ़स्थानमें अनुप्रविष्ट, बुद्धिरूप गुहामें स्थित, गहन स्थानमें रहनेवाले उस पुरातन देवको अध्यात्मयोगकी प्राप्तिद्वारा जानकर बुद्धिमान् पुरुष हर्ष-शोकको त्याग देता है,' 'उसका साक्षात्कार करके पुरुष मृत्युके मुखसे छूट जाता है', 'ब्रह्मानन्दको जाननेवाला पुरुष किसीसे भय नहीं मानता', 'उस परावर ( कार्य-कारणरूप ) परमात्माका साक्षात्कार हो जानेपर इसके हृदयकी चिज्जडग्रन्थि टूट जाती है, सारे संदेह निवृत्त हो जाते हैं और समस्त कर्म क्षीण हो जाते हैं' इत्यादि ।

तथा श्रीभगवान् भी कहते हैं—'यह आत्मतत्त्व अव्यक्त, अचिन्तनीय और अविकारी कहा जाता है । अतः इसे ऐसा जानकर तुझे शोक नहीं करना चाहिये । हे भारत ! इस आत्मतत्त्वको जानकर बुद्धिमान् पुरुष कृतकृत्य हो जाता है ।' कावषेयगीतामें भी कहा है—'आत्मज्ञ और शोकसे पार हुआ पुरुष मृत्युकी संनिधि, मरण अथवा किसी अन्य निमित्तसे होनेवाले भय आदि


RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



न जायते न म्रियते न वध्यो न च घातकः ।
न बद्धो बद्धकारी वा न मुक्तो न च मोक्षदः ॥
पुरुषः परमात्मायं यत्ततोऽन्यदसच्च तत् ।
अज्ञानपाशे निर्भिन्ने छिन्ने महति संशये ॥
शुभाशुभे च संकीर्णे दग्धे बीजे च जन्मनाम् ।
प्रयाति परमानन्दं तद्विष्णोः परमं पदम् ॥ इति ।

तथा चाह भगवान् मनुः—

सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् ।
तद्ध्यग्रं सर्वविद्यानां प्राप्यते ह्यमृतं ततः ॥
एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः ।
प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा ॥ इति ॥

यस्मात्तद्विज्ञानादेव परमपुरुषार्थप्राप्तिः, तस्मात्तमेव परमानन्दात्मानम् आत्मत्वेन जानीयादयमहमस्मीति न किंचिदन्यच्चिन्तयेत् । तथा च श्रुतिः— 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद्बहूञ्छब्दान् वाचो विग्लापनं हि तत् ॥' इति । 'तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथ', 'एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किंचित्' इति । तथा च भगवान् वासुदेवः—

संकल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥
शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥

इति ॥ एवं प्रसंगात्सर्वशास्त्रार्थः संक्षेपतो दर्शितः ॥

अथेदानीं प्रकृतमनुसरामः—यस्मात्प्रमाद एव सर्वानर्थबीजं तस्मात् प्रमादमेवाहं मृत्युं ब्रवीमि । न

किसी भी कारणसे नहीं डरता; क्योंकि वह आत्मा न तो उत्पन्न होता है न मरता है, न मारा जानेवाला न मारनेवाला है, न बद्ध है न बाँधनेवाला है और न मुक्त या मुक्ति देनेवाला ही है । यह पुरुष ही परमात्मा है । जो कुछ उससे भिन्न है, वह असत् है । अज्ञानरूप बन्धनके टूट जानेपर, महान् संशयके निवृत्त हो जानेपर, शुभाशुभ कर्मोंका संकोच हो जानेपर तथा जन्म-मरणके बीजका दाह हो जानेपर पुरुष भगवान् विष्णुके उस परमानन्दमय परमपदको प्राप्त हो जाता है ।' भगवान् मनुने भी कहा है—'इन सबमें आत्मज्ञान ही सर्वोत्कृष्ट माना गया है, वही समस्त विद्याओंमें श्रेष्ठ है; क्योंकि उससे अमरत्वकी प्राप्ति होती है । यही विशेषतः ब्राह्मणके लिये जन्मकी सफलता है । इसे पाकर ही द्विज कृतकृत्य होता है, किसी अन्य प्रकार नहीं ।'

क्योंकि उसके ज्ञानसे ही परम पुरुषार्थकी प्राप्ति होती है, अतः उस परमानन्दस्वरूप परमात्माको 'वह मैं हूँ' इस प्रकार आत्मस्वरूपसे जानना चाहिये, अन्य किसीका भी चिन्तन न करना चाहिये । जैसा कि श्रुति भी कहती है—'बुद्धिमान् ब्रह्मज्ञ पुरुषको उस परमात्माका ही ज्ञान प्राप्तकर उसीमें बुद्धिको स्थिर करना चाहिये । बहुत-से शास्त्रोंका अध्ययन न करे; क्योंकि वह ( बहुशास्त्राध्ययन ) तो वाणीको कष्ट देना ही है ।' 'एक उस आत्माको ही न जानो, और बातें छोड़ो' तथा 'अपने आत्मामें स्थित यही सर्वदा ज्ञातव्य है, उससे भिन्न और कुछ भी जाननेयोग्य नहीं है ।' ऐसा ही भगवान् वसुदेवनन्दन भी कहते हैं—'संकल्पसे उत्पन्न होनेवाली समस्त कामनाओंको सर्वथा त्यागकर तथा मनसे ही समस्त इन्द्रियोंको सब ओरसे रोककर धैर्यपूर्वक स्थिर की हुई बुद्धिके द्वारा मनको धीरे-धीरे शान्त करे तथा उसे आत्मामें स्थिर करके फिर कुछ भी चिन्तन न करे ।' इस प्रकार प्रसंगवश सभी शास्त्रोंका विषय संक्षेपसे दिखला दिया गया है ।

अब हम प्रसङ्गका अनुसरण करते हैं । क्योंकि प्रमाद ही समस्त अनर्थोंका मूल है, इसलिये मैं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2


यमम्। यमं तु पुनरेके विषयविषान्धा अविद्याधिरूढाः स्वात्मव्यतिरेकेण द्वितीयं पश्यन्तो मृत्युमतो मयोक्तान्मृत्योःप्रमादादन्यं मृत्यवन्तरं वैवस्वतमाहुः, आत्मावासम् आत्मनि बुद्धौ वसतीत्यात्मावासस्तम्। तथा चाह मनुः—

यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः।
तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः॥

अमृतम् अमरणधर्माणं ब्रह्मचर्यं ब्रह्मणि स्वात्मभूते रममाणं ब्रह्मनिष्ठमित्यर्थः। श्रूयते कठवल्लीषु—'कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति' इति। किं च पितृलोके राज्यमनुशास्तीति देवः। कथमनुशास्ति? शिवः सुखप्रदः शिवानां पुण्यकर्मणाम्, अशिवोऽसुखप्रदोऽशिवानां पापकर्मणाम्॥ ६॥

प्रमादको ही मृत्यु बतलाता हूँ, यमको नहीं; किंतु कुछ दूसरे लोग, जो विषयरूप विषसे अन्धे, अविद्याग्रस्त और अपनेसे भिन्न कोई दूसरा मृत्यु देखनेवाले हैं, वे मेरे बतलाये हुए प्रमादसंज्ञक मृत्युसे भिन्न यमको अर्थात् विवस्वान्के पुत्र यमराजको ही मृत्यु बतलाते हैं; किंतु यह यम तो आत्मावास है। जो आत्मा अर्थात् बुद्धिमें रहता है, उसे 'आत्मावास' कहते हैं। जैसा कि भगवान् मनु कहते हैं—'यम सूर्यवंशी राजा है, जो कि तेरे हृदयमें स्थित है। यदि उससे तेरा कोई विरोध नहीं है तो तू भले ही मत गङ्गाको जा और मत कुरुक्षेत्रको।' तथा यह अमृत—अमरणधर्मा और 'ब्रह्मचर्य'—अपने आत्मभूत ब्रह्ममें रमण करनेवाला अर्थात् ब्रह्मनिष्ठ है। जैसा कि कठोपनिषद्में सुना जाता है—'उस हर्षयुक्त और हर्षरहित देवको मेरे सिवा और कौन जान सकता है?' तथा वह देव पितृलोकमें राज्य-शासन करता है। किस प्रकार शासन करता है?—शिव अर्थात् पुण्यकर्माओंके लिये शिव—सुखप्रद होकर तथा अशिव—पापकर्माओंके लिये अशिव—दुःखप्रद होकर॥ ६॥

### *कामादिके द्वारा प्रमादका बन्धहेतुत्व*

एवं तावत् 'प्रमादं वै मृत्युम्' इति मृत्युरूपं निर्धारितम्। इदानीं तस्यैव कार्यात्मनावस्थानं दर्शयति—

इस प्रकार यहाँतक तो 'प्रमाद ही मृत्यु है' ऐसा कहकर मृत्युका स्वरूप निश्चय किया गया। अब यहाँसे उसीकी कार्यरूपसे स्थिति दिखलाते हैं—

आस्यादेष निःसरते नराणां क्रोधः प्रमादो मोहरूपश्च मृत्युः।
अहंगतेनैव चरन् विमार्गान्न चात्मनो योगमुपैति किंचित्॥ ७॥

यह मृत्यु मनुष्योंके आस्य ( अहंकार या काम ) से उत्पन्न होता है तथा क्रोध, प्रमाद एवं मोहरूप हो जाता है। अतः यह जीव अहंकारस्थित अज्ञानके अधीन होकर विपरीत मार्गोंसे चलते रहनेके कारण परमात्माका कुछ भी योग प्राप्त नहीं कर पाता॥ ७॥

यः प्रमादाख्योऽज्ञानमृत्युः स प्रथममास्यात्मना परिणमते। आस्योऽभिमानात्मकोऽहंकारः। तथा

जो प्रमादसंज्ञक अज्ञानरूप मृत्यु है, वह पहले आस्यरूपमें परिणत होता है। 'आस्य' अभिमानात्मक अहंकारका नाम है। ऐसा ही

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चोक्तम्—
सर्वार्थक्षेपसंयोगादसुधातुसमन्वयात् ।
आस्य इत्युच्यते घोरो ह्यहंकारो गुणो महान् ॥

कहा भी है—'सब प्रकारके पदार्थोंका क्षय करने के कारण तथा 'असु' धातुसे युक्त होनेके कारण 'आस्य' शब्दसे अत्यन्त घोर अहंकाररूप गुण कहा जाता है।'

एवमहंकारात्मना स्थित्वा ततोऽहंकारान्निःसरते निर्गच्छति कामात्मना । ततः कामः स्वविषये प्रवर्तमानः प्रतिहतः क्रोधः प्रमादो मोहरूपश्च भवति । ततोऽहंगतेनाहंरूपमापन्नेनाहंकाराद्यात्मना स्थितेनाज्ञानेन तदात्मभावमापन्नः, 'ब्राह्मणोऽहं क्षत्रियोऽहं वैश्योऽहं शूद्रोऽहं स्थूलोऽहं कृशोऽहममुष्य पुत्रोऽस्य नप्ता' इत्येवमात्मको रागद्वेषादिसमन्वितश्चरन् विमार्गान् श्रौतस्मार्तविपरीतान् मार्गान् न चात्मनः परमात्मनो योगं समाधिलक्षणमुपैति किंचिदपि ।

इस प्रकार अहंकाररूपसे स्थित होकर फिर अहंकारसे कामरूपमें प्रकट होता है । तत्पश्चात् अ... विषयमें प्रवृत्त हुआ काम बाधा पड़नेपर क्रोध, प्रमाद मोहरूप हो जाता है । फिर अहंगत अहंरूपको प्राप्त अर्थात् अहंकारादिरूपसे स्थित हुए अज्ञानके वशी... हो अर्थात् तद्रूपताको प्राप्त हो 'मैं ब्राह्मण हूँ, मैं क्ष... हूँ, मैं वैश्य हूँ, मैं शूद्र हूँ, मैं स्थूल हूँ, मैं कृश हूँ, इसका... हूँ, इसका नाती हूँ' इस प्रकार राग-द्वेषादिसे युक्त हो... विमार्गोंमें अर्थात् श्रुति-स्मृतिप्रतिपादित मार्गोंसे वि... मार्गोंमें चलता हुआ यह जीव आत्मा यानी परमात्म... समाधिरूप योगको तनिक भी प्राप्त नहीं करता ।

अथवाविद्याकामकर्माणि संसारस्य प्रयोजकभूतानि । पूर्वत्र 'मोहो मृत्युः सम्मतः' इत्यनेनाग्रहणान्यथाग्रहणात्मिका अविद्या दर्शिता । उत्तरत्र 'कर्मोदये' इति कर्म वक्ष्यति ।

अथवा, (यों समझो कि) अविद्या, कामना और कर्म ये संसारके प्रयोजक हैं । पहले 'मोहो मृत्युः सम्मतः कवीनाम्' ( १ । ४ ) इत्यादि वाक्यद्वारा अग्र... और अन्यथाग्रहणरूपा अविद्याका वर्णन किया गया... आगे 'कर्मोदये कर्मफलानुरागाः' ( १ । ९ ) इत्यादि वाक्यसे कर्मका वर्णन किया जायगा ।

अथेदानीं कामोऽभिधीयते—अस्यन्ते क्षिप्यन्ते अनेन संसारे प्राणिन इत्यास्यः कामः । अथवा—आस्यवदास्यं सर्वजग्धृत्वात् । तथा चोक्तं भगवता—'काम एष क्रोध एषः' इति । एष मृत्युरास्यात्मना स्थित्वा ततः क्रोधात्मना विपरिणमते । उक्तं च—'कामात्क्रोधोऽभिजायते' इति । ततोऽहंगतेनाहंकारापन्नेनाज्ञानेनाहंकार ममकार फलकारूढेन चिदाभासेन चरन् विमार्गान् न चात्मनो योगमुपैति किंचित् ॥ ७ ॥

अब यहाँ कामका वर्णन किया जाता है । इ... ( काम ) के द्वारा प्राणी संसारमें डाले जाते हैं, इ... लिये काम 'आस्य' है । अथवा भक्षण करनेवाला हो... यह आस्य ( मुख ) के समान आस्य है; जैसा कि श्रीभगवान्‌ने कहा है—'यही ( महान् भक्षणशील औ... अत्यन्त पापी ) काम और यही क्रोध है' इत्यादि यह मृत्यु पहले आस्य—कामरूपसे स्थित होकर फि... क्रोधरूपमें परिणत हो जाता है । कहा भी है—'काम... क्रोध उत्पन्न होता है' इत्यादि । फिर अहंगत—अहंकाररूपको प्राप्त हुए अज्ञानके द्वारा अर्थात् अहंका... और ममतारूप दर्पणपर प्रतिफलित हुए चिदाभास रूपसे विपरीत मार्गोंमें चलता हुआ यह जीव आत्माक... कुछ भी योग प्राप्त नहीं करता ॥ ७ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2


किंच—

तथा—

ते मोहितास्तद्वशे वर्त्तमाना इतः प्रेतास्तत्र पुनः पतन्ति ।
ततस्तं देवा अनु परिप्लवन्ते अतो मृत्युं मरणादभ्युपैति ॥ ८ ॥

वे, जो उस अहंकारके वशीभूत हैं, मोहग्रस्त रहते हैं और इस लोकसे ( मरकर ) जानेपर पुनः इसीमें गिरते हैं । इसके पश्चात् उस जीवको इन्द्रियगण भटकाते रहते हैं, इसलिये वह पुनः मृत्युसे मृत्युको ही प्राप्त होता है ॥ ८ ॥

तेऽहंकारादिरूपेण स्थितेनाज्ञानेन मोहिताः—देहाद्यात्मभावमापादिताः, तद्वशेऽहंकाराद्यात्मना परिणतप्रमादाख्यमृत्युवशे वर्त्तमाना इतोऽस्मात्प्रेता धूमादिमार्गेण गत्वा तत्र परलोके यावत्सम्पातमुषित्वा पुनराकाशवायुवृष्टिसस्यान्नशुक्रशोणितादिक्रमेण देहग्रहणाय पतन्ति निपतन्ति । श्रूयते च—'तस्मिन् यावत् सम्पातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते' ।

अहंकारादिरूपसे स्थित हुए उस अज्ञानके द्वारा मोहित—देहादिमें आत्मभावको प्राप्त कराये हुए तथा उसके अधीन अर्थात् अहंकारादिरूपमें परिणत उस प्रमादसंज्ञक मृत्युके अधीन हुए वे लोग यहाँ—इस लोकसे ( मरकर ) जानेपर धूमादि मार्गसे जाकर पतन होनेपर्यन्त परलोकमें रहकर आकाश, वायु, वृष्टि, सस्य, अन्न एवं शुक्र-शोणितादि क्रमसे पुनः देह ग्रहण करनेके लिये ( इसी लोकमें ) गिरते हैं । ( इस विषयमें ) ऐसी श्रुति भी है—'उस ( परलोक ) में पतनकाल उपस्थित होनेतक रहकर वे पुनः इसी मार्गमें लौट आते हैं ।'

ततोऽनन्तरं पुनर्देहग्रहणावस्थायां तं देवा इन्द्रियाण्यनुसृत्य कर्माणि परिसमन्तात्प्लवन्ते समन्ततः परिवर्तन्त इत्यर्थः । अतोऽस्मात्कारणादिन्द्रियगुणानुसरणान्मृत्युं मरणं याति । ततो मरणाज्जन्माभ्युपैति ततो मृत्युम् । एवं जन्ममरणप्रबन्धारूढो न कदाचिन्मुच्यत इत्यर्थः । आत्माज्ञाननिमित्तत्वात्संसारस्य यावत्परमात्मानमात्मत्वेन साक्षान्न जानाति तावदयं तापत्रयाभिभूतो मकरादिभिरिव रागद्वेषादिभिरितस्ततः समाकृष्यमाणो मोमुह्यमानः संसरन्नवतिष्ठत इत्यर्थः ॥८॥

फिर इसके पश्चात् देहधारणकी अवस्थामें उसके कर्मोंका अनुसरण करते हुए उसे देव—इन्द्रियगण परिप्लवित करते हैं—परि—सब ओर 'प्लवन्ते' परिवर्तित करते ( भटकाते ) हैं । अतः इस कारणसे अर्थात् इन्द्रियोंके गुणोंका अनुसरण करनेसे वह मरणको प्राप्त होता है और उस मृत्युसे जन्मान्तरको तथा उससे पुनः मृत्युको प्राप्त होता है । तात्पर्य यह है कि इस प्रकार जन्म-मरणकी परम्परामें पड़ा हुआ यह जीव कभी मुक्त नहीं होता । अर्थात् जबतक यह परमात्माको साक्षात् अपने आत्मस्वरूपसे नहीं जानता, तबतक यह तापत्रयसे दबा रहकर मकरादिके समान रागादि दोषोंसे इधर-उधर खींचा जाता हुआ मोहग्रस्त हो जन्म-मरणरूप संसारमें पड़ा रहता है; क्योंकि संसारका कारण आत्माका अज्ञान ही है ॥ ८ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2


एवं तावदविद्याकामयोर्बन्धहेतुत्वमभिहितम् । अथेदानीं कर्मणां बन्धहेतुत्वमाह—

इस प्रकार यहाँतक अविद्या और कामकी बन्धहेतुताका प्रतिपादन किया गया । अब यहाँसे कर्मोंकी बन्धहेतुताका वर्णन किया जाता है—

**कर्मोदये कर्मफलानुरागास्तत्रानुयान्ति न तरन्ति मृत्युम् ।**
**सदर्थयोगानवगमात्समन्तात् प्रवर्तते भोगयोगेन देही ॥ ९ ॥**

कर्मानुष्ठान करनेपर कर्मफलमें आसक्त हुए जीव उस ( कर्मविपाक ) का ही अनुसरण करते हैं । वे मृत्युको पार नहीं कर पाते । देहधारी जीव सद्वस्तुके योगका ज्ञान न होनेसे ही भोगवश सब ओर भटकता रहता है ॥ ९ ॥

अमृत्युः कर्मणा केचिदिति कर्मणामृतत्वं भवतीति यन्मतान्तरमुपन्यस्तं तन्निराकरोति— न केवलं कर्मणा अमृतत्वं भवति, अपितु कर्मोदये कर्मणामुत्पत्तौ कर्मफलानुरागाः सन्तस्तत्र तस्मिन् कर्मफलेऽनुयान्ति । यस्मात्तत्रैवानुयान्ति, अतो न तरन्ति मृत्युं पुनः पुनर्जन्ममरणात्मके संसारे परिवर्त्तन्त इत्यर्थः ।

'अमृत्युः कर्मणा केचित्' इस श्लोकद्वारा जो 'कर्मसे अमृतत्व होता है' ऐसे एक मतान्तरका उल्लेख किया है, उसका अब निराकरण करते हैं—कर्मसे अमृतत्व नहीं होता, केवल इतना ही नहीं, बल्कि कर्मोदय अर्थात् कर्मोंकी उत्पत्ति होनेपर जीव कर्मफलके अनुरागी होकर उस कर्मफलका ही अनुसरण करते हैं । क्योंकि वे कर्मफलका ही अनुसरण करते हैं, इसलिये मृत्युको पार नहीं कर पाते, अर्थात् वारंवार जन्म-मरणरूप संसारमें ही भटकते रहते हैं ।

कस्मात्पुनः कर्मोदये कर्मफलानुरागास्तत्रैव परिवर्त्तन्ते ? सदर्थयोगानवगमात् । सदर्थेन योगः सदर्थयोगः परमात्मना योगस्तस्य सदर्थयोगस्य एकत्वस्यानवगमात् स्वात्मनश्चिदानन्दाद्वितीयब्रह्मभावानवगमादित्यर्थः । समन्तात्समन्ततः प्रवर्तते भोगयोगेन विषयरसबुद्ध्या देही । यथा ह्यन्धो निम्नोन्नतकण्टकस्थलादिषु परिभ्रमति, एवमसावपि विवेकहीनः सर्वत्र विषयसुखाकाङ्क्षया परिभ्रमति ॥ ९ ॥

किंतु कर्मकी उत्पत्ति होनेपर वे कर्मफलके अनुरागी होकर उसीमें क्यों भटकने लगते हैं ? ( इसपर कहते हैं—) सदर्थयोगका ज्ञान न होनेसे । सद्वस्तुके साथ जो योग है, उसे सदर्थयोग अर्थात् परमात्माके साथ योग कहते हैं, उस सदर्थयोग अर्थात् ( सद्वस्तुके साथ ) एकत्वका ज्ञान न होनेसे यानी अपने आत्माके चिदानन्दाद्वितीय ब्रह्मस्वरूपत्वका ज्ञान न होनेसे देही ( जीव ) भोगवश विषयरसबुद्धिके कारण सब ओर भटकता रहता है । जिस प्रकार अन्धा आदमी नीचे, ऊँचे और कण्टकाकीर्ण स्थानोंमें घूमता रहता है, उसी प्रकार यह भी विवेकहीन होकर विषयसुखकी इच्छासे सर्वत्र भटकता रहता है ॥ ९ ॥

किंच—

तथा—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2


तद्वै महामोहनमिन्द्रियाणां मिथ्यार्थयोगेऽस्य गतिर्हि नित्या ।
मिथ्यार्थयोगाभिहतान्तरात्मा स्मरन्नुपास्ते विषयान् समन्तात् ॥ १० ॥

यह ( भोग-प्रवृत्ति ) ही इन्द्रियोंका महामोह है; क्योंकि मिथ्या पदार्थोंके प्रति इस जीवकी निश्चित प्रवृत्ति है, अतः यह उन मिथ्या पदार्थोंके संयोगसे अपने स्वरूप ( स्वाभाविक ब्रह्मभाव ) से भ्रष्ट होकर विषयोंका स्मरण करते हुए सब प्रकार उन्हींका सेवन करता है ॥ १० ॥

यद्रागाभिभूतस्य इन्द्रियाणां विषयेषु प्रवर्त्तनं तन्महामोहनम् । एतदुक्तं भवति—यस्य विषयेषु अवास्तवबुद्धिस्तस्येन्द्रियाणि विषयेषु न प्रवर्तन्ते । तस्य विषयेषु प्रवृत्त्यभावात् प्रत्यगात्मन्येव प्रवृत्तिः, ततश्च मोहनिवृत्तिः । यस्य विषयेषु वास्तवबुद्धिस्तस्येन्द्रियाणां पराग्भूतेषु विषयेषु प्रवृत्तत्वान्न स इमं सदद्वितीयं प्रत्यग्भूतं परमात्मानमात्मत्वेन साक्षाज्जानाति । तथा चोक्तम्—'स्त्रीपिण्डसम्पर्ककलुषितचेतसो विषयविषान्धा ब्रह्म न जानन्ति' इति ।

ततश्च महामोहेन पुनः पुनर्विषयेषु प्रवृत्तिः । तथा चाह भगवान् मनुः—

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥इति॥

ततश्च मिथ्यार्थैरविद्याकल्पितैः शब्दादिविषयैर्योगो भवति । तस्मिन् मिथ्यार्थयोगेऽस्य देहिनो गतिः संसारगतिर्नित्या नियता । प्रसिद्धं ह्येतत्—स्वात्मभूतं परमात्मानमनवगम्य विषयेषु प्रवर्तमानाः पराभूतास्तिर्यगादियोनिं प्राप्नुवन्तीति । तथा च बह्वृचब्राह्मणोपनिषदि—'या वै ता इमाः प्रजास्तिस्रोऽत्यायमायंस्तानीमानि वयांसि वङ्गावगधाश्चेरपादाः' इति । वक्ष्यति च—'कामानुसारी पुरुषः कामाननु विनश्यति' इति ।

रागाभिभूत जीवका जो इन्द्रियोंके विषयोंमें प्रवृत्त होना है, वही महामोह है । इस विषयमें ऐसा कहा जाता है कि जिसकी विषयोंमें अवास्तव बुद्धि होती है, उसकी इन्द्रियाँ विषयोंमें प्रवृत्त नहीं होतीं तथा विषयोंमें प्रवृत्ति न होनेके कारण उसकी प्रत्यगात्माके प्रति ही प्रवृत्ति होती है और उससे उसके मोहकी निवृत्ति हो जाती है; किंतु जिसकी विषयोंमें वास्तव बुद्धि होती है, वह इन्द्रियोंके बाह्य विषयोंमें प्रवृत्त रहनेके कारण इस सत्स्वरूप अद्वितीय एवं प्रत्यग्भूत परमात्माको साक्षात् आत्मस्वरूपसे नहीं जानता । जैसा कहा है—'जिनका चित्त स्त्रीशरीरके संसर्गसे कलुषित हो गया है, वे विषयरूप विषसे अन्धे हुए जीव ब्रह्मको नहीं जानते ।'

इसीसे महामोहके कारण उनकी पुनः-पुनः विषयोंमें प्रवृत्ति होती है । ऐसा ही भगवान् मनु भी कहते हैं—'विषयोंकी इच्छा कभी उनके सेवनसे शान्त नहीं होती, बल्कि हविसे अग्निके समान उनसे तो वह और भी बढ़ जाती है ।'

उसके पश्चात् मिथ्या पदार्थोंसे अर्थात् अविद्याद्वारा कल्पना किये हुए शब्दादि विषयोंसे सम्बन्ध होता है । उस मिथ्या वस्तुओंके संयोगके होनेपर इस देहीकी संसारमें प्रवृत्ति होनी निश्चित है । यह तो प्रसिद्ध ही है कि जीव अपने आत्मभूत परमात्माको न जानकर विषयोंमें प्रवृत्त होते हुए बहिर्मुख होकर तिर्यगादि योनिको प्राप्त होते हैं । ऐसा ही ऋग्वेदीय ब्राह्मणोपनिषद्में भी कहा है—'जिन इन तीन प्रसिद्ध प्रजाओंने धर्मका उल्लङ्घन किया था, वे ये पक्षी, वङ्ग ( वनके वृक्ष ), वगध ( ओषधियाँ ) और इरपद ( सर्पादि ) हैं ।' तथा आगे भी कहेंगे कि 'कामका अनुसरण करनेवाला पुरुष कामनाओंके पीछे ही नष्ट हो जाता है ।'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2


कस्मात्पुनर्मिथ्यार्थयुक्तस्य गतिर्हि नित्येति ? तत्राह—मिथ्यार्थयोगाभिहतान्तरात्मा । मिथ्याभूतविषयसंयोगेनाभिहतान्तरात्मा यस्य सः अभिहतस्वाभाविकब्रह्मभावः स्मरन् शब्दादिविषयान् तानेवोपास्ते न परमात्मानं समन्तात् समन्ततः॥१०॥

तो फिर ऐसा क्यों कहा कि मिथ्या वस्तुओंके प्रति इसकी प्रवृत्ति स्वाभाविकी है ? इसपर कहते हैं कि मिथ्या विषयोंके संयोगसे अभिहतान्तरात्मा अर्थात् मिथ्या विषयोंका संयोग होनेसे जिसके अन्तरात्माका अभिघात हो गया है ऐसा स्वाभाविक ब्रह्मभावसे भ्रष्ट हुआ पुरुष स्त्री आदि विषयोंका स्मरण करता हुआ सब ओरसे उन्हींका सेवन करता है, परमात्माकी उपासना नहीं करता ॥ १० ॥

ततः किमिति चेत्तत्र यद्भवति तच्छृणु—

यदि कहो कि इससे क्या होता है तो ऐसी अवस्थामें जो होता है, वह सुनो—

अभिध्या वै प्रथमं हन्ति चैनं कामक्रोधौ गृह्य चैनं च पश्चात् ।
एतान् बालान् मृत्यवे प्रापयन्ति धीरास्तु धैर्येण तरन्ति मृत्युम् ॥ ११ ॥

पहले तो इसे विषय-चिन्ता भ्रष्ट करती है, फिर काम और क्रोध इसे पकड़कर नष्ट कर देते हैं । ये सब मूर्ख जीवोंको मृत्युको प्राप्त करा देते हैं, किंतु बुद्धिमान् पुरुष तो धैर्यपूर्वक मृत्युको पार कर जाते हैं ॥११॥

अभिध्या विषयध्यानं प्रथमं हन्ति विनाशयति स्वरूपात्प्रच्युतं करोति, ततो विषयध्यानाभिहतमेनं विषयसंनिधौ शीघ्रं प्रतिगृह्य कामश्च हन्ति । ततः कामाभिहतमेनं प्रतिगृह्य क्रोधश्च हन्ति ।

पहले तो इसे अभिध्या—विषयचिन्ता नष्ट करती अर्थात् स्वरूपसे च्युत कर देती है । फिर विषय-चिन्ताद्वारा नष्ट हुए इस जीवको शीघ्र ही विषयकी संनिधिमें पकड़कर काम नष्ट करता है और तत्पश्चात् कामद्वारा अभिहत हुए इसे क्रोध नष्ट कर देता है ।

तदेतेऽभिध्यादय एतानभिध्याकामक्रोधवशंगतान् बालानविवेकिनो मूढान् मृत्यवे प्रापयन्ति क्षिपन्ति । श्रूयते च कठवल्लीषु—

पराचः कामाननुयन्ति बाला-
स्ते मृत्योर्यन्ति विततस्य पाशम् ।
अथ धीरा अमृतत्वं विदित्वा
ध्रुवमध्रुवेष्विह न प्रार्थयन्ते ॥ इति ।

वे ये अभिध्या आदि अभिध्या, काम और क्रोधके वशीभूत हुए इन बाल—विवेकहीन अर्थात् मूढ पुरुषोंको मृत्युको प्राप्त करा देते हैं; यानी उन्हें मृत्युके पंजेमें डाल देते हैं । कठवल्लियोंमें सुना भी जाता है—'मूढ पुरुष बाह्य भोगोंका ही अनुसरण करते हैं, अतः वे मृत्युके विस्तृत पाशमें पड़ते हैं; किंतु जो बुद्धिमान् हैं, वे अमृतत्वको ध्रुव (निश्चल) जानकर इन नाशवान् पदार्थोंमेंसे किसीकी इच्छा नहीं करते ।'

धीरास्तु पुनर्धैर्येण विषयान् जित्वा परमात्मानमात्मत्वेनावगम्य तरन्ति मृत्युम् । श्रूयते च—'निचाय्य तं मृत्युमुखात्प्रमुच्यते' इति ॥ ११ ॥

किंतु बुद्धिमान् पुरुष तो धैर्यपूर्वक समस्त विषयोंको जीतकर परमात्माको अपने आत्मस्वरूपसे जानकर मृत्युके पार हो जाते हैं । जैसी कि 'उसे जानकर पुरुष मृत्युके मुखसे छूट जाता है' यह श्रुति भी है ॥११॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2


*विवेकी मृत्युकी मृत्यु है*

कथं पुनर्धीरास्तु धैर्येण विषयान् जित्वा मृत्युं तरन्तीत्यत आह—

बुद्धिमान् लोग धैर्यपूर्वक विषयोंको जीतकर किस प्रकार मृत्युके पार हो जाते हैं? सो बतलाते हैं—

**योऽभिध्यायन्नुत्पतिष्णून्निहन्यादनाचारेणाप्रतिबुध्यमानः ।**
**स वै मृत्युं मृत्युरिवात्ति भूत्वा ह्येवं विद्वान् योऽभिहन्तीह कामान् ॥ १२ ॥**

जो पुरुष क्षणभङ्गुर विषयोंको तुच्छ समझकर त्याग देता है और निरादरपूर्वक उन्हें फिर स्मरण नहीं करता एवं जो ऐसा समझकर विषयोंकी कामनाको भी नष्ट कर देता है, वह निश्चय ही [ मृत्युका मृत्युरूप होकर ] मृत्युके समान ही मृत्युको भक्षण कर जाता है ॥ १२ ॥

योऽभिध्यायन्, अनित्याशुचिदुःखानुविद्धतया उत्पतिष्णून् उत्पत्योत्पत्य पतन्तीत्युत्पतिष्णवो विषयास्तान्निहन्यात् परित्यजेत् । अनाचारेण अनादरेण अमेध्यदर्शन इव अप्रतिबुध्यमानः पुनः पुनरचिन्तयन् स वै पुरुषो मृत्योरेव मृत्युर्भूत्वा मृत्युरिवात्ति मृत्युम् । उक्तं च—'विषयप्रतिसंहारं यः करोति विवेकतः । मृत्योर्मृत्युरिति ख्यातः स विद्वानात्मवित्कविः' इति ॥ १२ ॥

जो उत्पतिष्णु—जो उत्पन्न हो-होकर नष्ट होनेवाले हैं, उन विषयोंको 'अभिध्यायन्'—अनित्य, अपवित्र और दुःखमिश्रित समझकर त्याग देता है और अपवित्र वस्तुको देखनेके समान अनाचार—अनादर अर्थात् उदासीनतापूर्वक उन्हें फिर चिन्तन नहीं करता, वह पुरुष निश्चय ही मृत्युका भी मृत्यु होकर मृत्युके समान ही मृत्युको खा जाता है; जैसा कि कहा भी है—'जो विवेकद्वारा विषयोंका नाश कर देता है, वह विद्वान् आत्मवेत्ता क्रान्तदर्शी पुरुष मृत्युका भी मृत्यु कहा गया है' ॥ १२ ॥

---

एवमनित्यादिरूपेण विद्वान् सन् अनादरादिना अभिहन्ति कामान् । यः पुनरनादरादिना नाभिहन्ति स किं करोतीत्याह—

इस प्रकार अनित्यादिरूपसे चिन्तन करता हुआ विद्वान् अनादरादिपूर्वक विषयोंको त्याग देता है; किंतु जो अनादरादिपूर्वक उनका त्याग नहीं करता, वह क्या करता है ? सो बतलाया जाता है—

**कामानुसारी पुरुषः कामाननु विनश्यति ।**
**कामान् व्युदस्य धुनुते यत्किंचित्पुरुषो रजः ॥ १३ ॥**

कामनाओंका अनुसरण करनेवाला पुरुष कामनाओंके साथ ही नष्ट हो जाता है । कामनाओंका त्याग करके पुरुष जो कुछ भी पाप-पुण्यादिरूप कर्म हैं, उनको ध्वंस कर देता है ॥ १३ ॥

यस्तु पुनर्विषयाभिध्यानेन कामानुसारी भवति स कामाननु विनश्यति कामविषये नष्टे कामाननु कामैः सह विनश्यति । अनित्याः कामगुणाः

जो पुरुष विषयोंका चिन्तन करता हुआ कामनाओंका अनुसरण करनेवाला होता है, वह कामनाओंके साथ ही नष्ट हो जाता है अर्थात् इच्छित विषयका नाश होनेपर उसके साथ ही वह भी नष्ट हो जाता है । कामनाके


RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



प्रतिक्षणं विनाशान्विताः, तद्वत्कामी विशीर्णो भवति।

यस्तु पुनर्विषयदोषदर्शनेन कामान् परित्यजति स कामान् व्युदस्य परित्यज्य विवेकबुद्ध्या धुनुते ध्वंसयति यत्किंचिदिह जन्मनि जन्मान्तरे च उपार्जितं रजः पुण्यपापादिलक्षणं कर्म ॥१३॥

विषयभूत पदार्थ अनित्य हैं और प्रतिक्षण विनाशायुक्त हैं। उन्हींके समान कामना करनेवाला पुरुष भी नष्ट हो जाता है।

किंतु जो पुरुष विषयोंमें दोषदृष्टि करके कामनाओंका त्याग कर देता है, वह उनका त्याग करके इस जन्म और जन्मान्तरमें जो कुछ रजस् अर्थात् पुण्य-पापरूप कर्म संचित किया होता है, उस सबको विवेकवती बुद्धि के द्वारा ध्वंस कर देता है ॥ १३ ॥

### देहासक्ति पतनका हेतु है

कथं पुनरस्य देहस्य काम्यमानस्य हेयत्वमित्याशङ्क्याह—

तो फिर कामनाके विषयभूत इस देहका हेयत्व किस प्रकार है? ऐसी आशङ्का करके कहते हैं—

देहोऽप्रकाशो भूतानां नरकोऽयं प्रदृश्यते।
गृध्यन्त एव धावन्ति गच्छन्तः श्वभ्रमुन्मुखाः ॥१४॥

यह जो जीवोंका देह दिखायी देता है, वह अन्धकाररूप और नरकमय है। जो लोग इसकी लालसा करते हुए इसकी ओर दौड़ते हैं, वे गढ़ेकी ओर जानेवाले [अन्धे] पुरुषोंके समान विवेकहीन होनेके कारण [नरकादिमें] गिरते हैं ॥ १४ ॥

योऽयं भूतानां देहो दृश्यते सोऽप्रकाशः—तमोऽचिद्घनः केवलं नरकः श्लेष्मासृक्पूयकृमिविण्मूत्रपूर्णत्वात्। तथा चाह भगवान् मनुः—

अस्थिस्थूणं स्नायुबद्धं मांसक्षतजलेपगम्।
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः॥
जराशोकसमाविष्टं रोगायतनमातुरम्।
रजस्वलमनित्यं च भूतावासमिमं त्यजेत्॥इति॥

एवमत्यन्तबीभत्सितं स्त्र्यादिदेहं कमनीयबुद्ध्या गृध्यन्तोऽभिकाङ्क्षन्त एव धावन्ति अनु धावन्ति। गच्छन्तः श्वभ्रमुन्मुखाः, यथा अन्धाः कूपादिकं विवेक्तुमशक्ताः कूपादिषून्मुखाः पतन्ति, एवं

यह जो प्राणियोंका शरीर देखा जाता है, वह कफ, रक्त, पीव, कृमि, विष्ठा और मूत्रसे पूर्ण होनेके कारण अप्रकाश—तमोमय यानी जडरूप और केवल नरक ही है। यही भगवान् मनुने भी कहा है—'जिसमें अस्थिरूप कड़ियाँ और स्नायुरूप बन्धन हैं, जो मांस और रक्तसे लिथड़ा हुआ, चर्मसे लिपटा हुआ, दुर्गन्धयुक्त एवं मल-मूत्रसे भरा हुआ है तथा जो जरा और शोकसे व्याप्त, रोगोंका घर, दुःखपूर्ण, मलिन और अनित्य है; ऐसे इस भूतावास (प्रेतादिके अथवा पञ्चभूतोंके आश्रयभूत शरीर) को त्याग दे।'

इस प्रकार अत्यन्त घृणित होनेपर भी लोग स्त्री आदिके शरीरको रमणीयबुद्धिसे चाहते हुए ही उसकी ओर दौड़ते हैं; किंतु 'गच्छन्तः श्वभ्रमुन्मुखाः'—जिस प्रकार अन्धेलोग कुएँ आदिका निश्चय करनेमें समर्थ न होनेके कारण उनकी ओर जाते हुए उनमें गिर जाते

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



स्त्र्याद्यभिकाङ्क्षन्तो विषयविषान्धा उन्मुखाः पतन्ति नरकेष्वित्यर्थः ॥ १४ ॥

हैं, उसी प्रकार स्त्री आदिकी इच्छा करनेवाले विषयरूप विषसे अन्धे हुए लोग उन ( नरकरूप शरीरों ) की ओर जाते हुए नरकोंमें गिरते हैं—ऐसा इसका तात्पर्य है ॥ १४ ॥

*विषयी जीवोंके जीवनकी व्यर्थता*

य एवं गृध्यन्त एव धावन्ति तेषां देहो निरर्थक इत्याह—

अब यह बतलाते हैं कि जो इस प्रकार कामना करते हुए विषयोंकी ओर दौड़ते हैं, उनका शरीर व्यर्थ ही है—

**अमन्यमानः क्षत्रिय कंचिदन्यं नाधीयते तार्णं इवास्य व्याघ्रः ।**
**क्रोधाल्लोभान्मोहभयान्तरात्मा स वै मृत्युस्त्वच्छरीरे य एषः ॥१५॥**

हे क्षत्रिय ! जो पुरुष इन विषयोंसे भिन्न किसी ईश्वरादिको न मानकर तत्सम्बन्धी शास्त्रोंका भी अध्ययन नहीं करता, उसका शरीर तृणके व्याघ्रके समान [ निरर्थक ] है । [ ऐसी अवस्थामें तो ] तेरे शरीरमें जो यह मोह एवं भयपूर्ण अन्तरात्मा है, वही क्रोध और लोभके कारण तेरी मृत्यु है ॥ १५ ॥

यः स्त्र्यादिकमभिकाङ्क्षन्ननुधावति स विषयविषान्धस्तद्व्यतिरिक्तं स्वात्मभूतं परमात्मानममन्यमानोऽप्रतिबुध्यमानो नाधीयते तद्विषयमध्यात्मशास्त्रं नाधिगच्छति । तस्यास्य विषयविषान्धस्य षडङ्गवेदविदुषोऽपि देहस्तृणनिर्मितव्याघ्र इव निरर्थको भवति । तथा चाह भगवान् वसिष्ठः—

चतुर्वेदोऽपि यो विप्रः सूक्ष्मं ब्रह्म न विन्दति ।
वेदभारभराक्रान्तः स वै ब्राह्मणगर्दभः ॥इति॥

जो स्त्री आदिकी लालसासे उनकी ओर दौड़ता है, वह विषयरूप विषसे अन्धा हुआ पुरुष उससे भिन्न अपने अन्तरात्मभूत परमात्माको न माननेके कारण अध्ययन यानी तद्विषयक अध्यात्मशास्त्रका आलोचन भी नहीं करता । छहों अङ्गोंके सहित समस्त वेदोंको जाननेवाले भी उस विषयरूप विषसे अन्धे हुए पुरुषका देह तृणनिर्मित व्याघ्रके समान व्यर्थ ही है । ऐसा ही भगवान् वसिष्ठजीने भी कहा है—'जो ब्राह्मण चारों वेदोंका ज्ञाता होनेपर भी सूक्ष्म परब्रह्मका अनुभव नहीं करता, वह वेदरूप भारसे दबा हुआ ब्राह्मणरूप गधा ही है ।'

न केवलं देहो निरर्थकः—य एवंभूतः स एव तस्य मृत्युरित्याह—क्रोधाल्लोभान्मोहभयान्तरात्मा इति । क्रोधलोभाभ्यां हेतुभ्यां मोहभयसमन्वितोऽन्तरात्मा त्वच्छरीरे य एष तवात्मा दृश्यते स एव तव मृत्युः । यः पुनरजितेन्द्रियः क्रोधलोभादिसमन्वितो विषयेषु प्रवर्तते स एव

उसका केवल देह ही निरर्थक नहीं है; बल्कि जो ऐसा है उसका तो वह स्वयं ही मृत्यु है, सो 'क्रोधाल्लोभान्मोहभयान्तरात्मा' इन पदोंसे बतलाते हैं । तेरे शरीरमें जो यह मोह और भयसे युक्त अन्तरात्मा दिखायी देता है, क्रोध और लोभरूप हेतुओंके कारण वही तेरी मृत्यु है । जो पुरुष अजितेन्द्रिय होता है और क्रोध एवं लोभादिसे युक्त होकर विषयोंमें प्रवृत्त होता

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



तस्य मृत्युः, विनाशहेतुत्वात् । उक्तं च—'आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः' इति ॥ १५ ॥

है, अपने विनाशका हेतु होनेके कारण वही उसकी मृत्यु है। ऐसा ही कहा भी है—'आत्मा ही अपना बन्धु है और आत्मा ही अपना शत्रु है' ॥ १५ ॥

*मृत्युनाशका उपाय*

तर्हि केनोपायेन मृत्योर्विनाश इत्याह—

तो फिर ( इस ) मृत्युका नाश किस प्रकार हो सकता है, सो बतलाते हैं—

**एवं मृत्युं जायमानं विदित्वा ज्ञानेन तिष्ठन्न बिभेति मृत्योः ।**
**विनश्यते विषये तस्य मृत्युर्मृत्योर्यथा विषयं प्राप्य मर्त्यः ॥१६॥**

इस प्रकार मृत्युको [ क्रोधादिरूपसे ] उत्पन्न होनेवाली जानकर पुरुष ज्ञानस्वरूपसे स्थित होकर मृत्युसे भय नहीं मानता; क्योंकि [ परमात्माका ] साक्षात्कार कर लेनेपर उस ज्ञानीकी मृत्यु उसी प्रकार नष्ट हो जाती है, जैसे मृत्युके अधिकारमें आकर मनुष्य मर जाता है ॥ १६ ॥

एवं क्रोधादिरूपेण जायमानं प्रमादाख्यं मृत्युं जननमरणादिसर्वानर्थबीजं विदित्वा क्रोधादीन् भूतदाहीयान् दोषान् परित्यज्याक्रोधादीन् सम्पाद्य ज्ञानेन चित्सदानन्दाद्वितीयब्रह्मात्मना तिष्ठन्न बिभेति मृत्योः । तथा च श्रुतिः—'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन' इति ।

इस प्रकार क्रोधादिरूपसे उत्पन्न होनेवाली प्रमाद-संज्ञक मृत्युको जन्म-मरणादि सम्पूर्ण अनर्थोंका बीज जानकर जीवोंको जलानेवाले क्रोधादि दोषोंको त्यागकर तथा अक्रोधादिका सम्पादन कर ज्ञान अर्थात् सच्चिदानन्दाद्वितीय ब्रह्मभावसे स्थित हुआ पुरुष फिर मृत्युसे नहीं डरता । ऐसी ही श्रुति भी है—'ब्रह्मानन्दको जाननेवाला पुरुष किसीसे भी भय नहीं मानता ।'

कस्मात्पुनर्ज्ञानेन तिष्ठन्न बिभेति मृत्योरित्याह—विनश्यते । तस्य ज्ञानिनो विषये गोचरे परमात्मनि साक्षात्क्रियमाणे प्रमादाख्योऽज्ञानमृत्युः । यथा मृत्योर्विषयं संसारमागतो मृत्युनाभिभूतो नष्टो भवति मर्त्यः, एवमात्मवेदिनो विषयमागतोऽज्ञानमृत्युर्नष्टो भवति । उक्तं च ज्ञानमहोदधौ—'ज्ञानसंस्थानसद्भावो ज्ञानाग्निर्ज्ञानवज्रभृत् । मृत्युं हन्तीति विख्यातः स वीरो वीतमत्सरः' इति ॥१६॥

किंतु ज्ञानस्वरूपसे स्थित रहनेपर पुरुष मृत्युसे क्यों नहीं डरता, सो बतलाते हैं—विषय—गोचर अर्थात् परमात्माका साक्षात्कार कर लेनेपर उस ज्ञानीकी प्रमाद-संज्ञक अज्ञानरूप मृत्यु नष्ट हो जाती है । जिस प्रकार मृत्युके विषयभूत संसारको प्राप्त हुआ मरणधर्मा जीव मृत्युसे अभिभूत होकर मर जाता है, उसी प्रकार आत्मज्ञानीके सामने आयी हुई अज्ञानरूप मृत्यु भी नष्ट हो जाती है । जैसा कि ज्ञानमहोदधिमें भी कहा है—'ज्ञानरूप अधिष्ठानमें रहनेवाले, ज्ञानाग्निस्वरूप तथा ज्ञानरूप वज्र धारण करनेवाले जिस पुरुषके विषयमें 'इसने मृत्युको मार दिया है' ऐसा प्रसिद्ध हो, वही मत्सरशून्य वीर है' ॥ १६ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



### ज्ञानीके कर्मत्यागमें धृतराष्ट्रकी शङ्का

एवं तावत् 'कर्मोदये' इत्यादिना कर्मणां बन्धहेतुत्वमुक्त्वा 'ज्ञानेन तिष्ठन्न बिभेति मृत्योः' इति ज्ञानस्यैव मोक्षसाधनत्वमभिहितम् । तत्र चोदयति धृतराष्ट्रः—

इस प्रकार यहाँतक 'कर्मोदये कर्मफलानुरागाः' इत्यादि श्लोकसे कर्मोंकी बन्धहेतुताका प्रतिपादन करके 'ज्ञानेन तिष्ठन्न बिभेति मृत्योः' इस वाक्यसे ज्ञानको ही मोक्षका साधन बतलाया गया । अब इसमें राजा धृतराष्ट्र शङ्का करते हैं—

धृतराष्ट्र उवाच—

यानेवाहुरिज्यया साधुलोकान् द्विजातीनां पुण्यतमान् सनातनान् ।
तेषां परार्थं कथयन्तीह वेदा एतद्विद्वान्नैति कथं नु कर्म ॥ १७ ॥

धृतराष्ट्रने कहा—श्रुतिने यज्ञके द्वारा द्विजोंको जिन पुण्यतम एवं नित्य लोकोंकी प्राप्ति बतलायी है, वेद उन्हींको परमपुरुषार्थ बतलाते हैं । ऐसा जानकर भी ब्रह्मवेत्ता कर्मानुष्ठान क्यों नहीं करता ? ॥ १७ ॥

ननु कथं कर्मणां बन्धहेतुत्वम् ? यावता यानेवाहुरिज्यया ज्योतिष्टोमादिना साधुलोकान् साधुभिर्धार्मिकैरारूढान् पुण्यतमान् पवित्रान् सनातनान् नित्यान् । तेषां ब्रह्मलोकपर्यन्तानां परार्थं परमपुरुषार्थत्वं कथयन्ति इह अस्मिन् संसारमण्डले वेदाः । एतद् लोकानां परमपुरुषार्थत्वं विद्वान् कथं नु साधनं कर्म नैति न गच्छति नानुतिष्ठतीत्यर्थः । अथवा, एतद् ब्रह्मलोकपर्यन्तानां लोकानां साधनभूतं कर्म विद्वान् ब्रह्मवित् कथं नैति नानुतिष्ठतीति ॥ १७ ॥

कर्मोंकी बन्धहेतुता कैसे मानी जाती है ? क्योंकि श्रुतिने ज्योतिष्टोमादि यज्ञोंके द्वारा जिन पुण्यतम—पवित्र एवं सनातन साधु लोकोंकी—साधु अर्थात् धार्मिक पुरुषों-द्वारा प्राप्त किये गये लोकोंकी—बात कही है, उन ब्रह्मलोकपर्यन्त लोकोंका ही वेद यहाँ—इस संसारमण्डलमें परार्थ—परमपुरुषार्थत्व बतलाते हैं । यह इन लोकोंका परमपुरुषार्थत्व जानकर भी पुरुष उनकी प्राप्तिके साधनभूत कर्मोंका अनुष्ठान क्यों नहीं करता ? अथवा [ यों समझो कि ] विद्वान्—ब्रह्मवेत्ता ब्रह्मलोकपर्यन्त समस्त लोकोंकी प्राप्तिके साधनभूत इस कर्मके प्रति क्यों नहीं जाता [ अर्थात् वह कर्मकी उपेक्षा क्यों करता है ? ] ॥ १७ ॥

### श्रीसनत्सुजातजीका उत्तर—ज्ञानीको कर्मानुष्ठानकी अपेक्षा नहीं

एवं पृष्टः प्राह भगवान् सनत्सुजातः—

इस प्रकार पूछे जानेपर भगवान् सनत्सुजातने कहा—

सनत्सुजात उवाच—

एवं ह्यविद्वानुपयाति तत्र तथार्थजातं च वदन्ति वेदाः ।
स नेह आयाति परं परात्मा प्रयाति मार्गेण निहन्त्यमार्गान् ॥ १८ ॥

श्रीसनत्सुजातजी बोले—इस प्रकार तो अज्ञानी ही उन ( कर्मों ) के प्रति जाते हैं और उन्हींके लिये वेदोंने अनेकों प्रयोजन बतलाये हैं; किंतु वह ( ब्रह्मवेत्ता ) इनमें प्रवृत्त नहीं होता । वह तो परमात्मस्वरूप हुआ परमात्माको ही प्राप्त होता है तथा अपने [ ज्ञान- ] मार्गके द्वारा [ कर्म-उपासनादि ] अमार्गोंका बाध कर देता है ॥ १८ ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



सत्यम्, एवमेव ब्रह्मलोकादिसाध्यं सुखं परमार्थं मन्यमानो विषयविषान्धो ह्यविद्वानुपयाति तत्र तस्मिन् ब्रह्मलोकादिसाधनभूते कर्मणि न विद्वान्, अविद्यादिदोषदर्शनात्। तथा च बृहदारण्यके—'अनन्दा नाम ते लोका अन्धेन तमसावृताः। तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधा जनाः' इति॥

तथार्थजातं च प्रयोजनजातं च तस्यैवाविदुषो वदन्ति वेदाः। यस्मादविदुष एव वदन्ति न विदुषः, तस्मान्नेह स विद्वान् ब्रह्मलोकाद्यनित्यसुखे तत्साधने वा कर्मणि आयाति प्रवर्तते। किं तर्हि कुरुते? तत्राह—परमात्मानमात्मत्वेनावगम्य परात्मा सन् ब्रह्मैव सन् परं प्रयाति। मार्गेण निहन्ति अमार्गान् संसारहेतुभूतानात्मनो विरुद्ध-मार्गान् धर्माधर्मोपासनारूपान्।

अथवा, 'एवं हि विद्वानुपयाति तत्र' इति पाठे सगुणब्रह्मविद्वान् तत्र ब्रह्मलोकादावुपासना-फलमुपयाति प्राप्नोति। तथार्थजातं च अस्य वदन्ति वेदाः। कीदृशं वदन्ति? स विद्वान् इह अस्मिन् लोके कर्मीव नायाति न जायते, किंतु मार्गेण ब्रह्मोपासनया अमार्गान् विरुद्धमार्गान् निहन्ति। एवं तत्र गत्वा संसारहेतून् अमार्गान् निहत्य परात्मा ब्रह्मात्मा सन् कालेन परं ब्रह्म प्रयातीत्यर्थः॥ १८॥

ठीक है, इस प्रकार ब्रह्मलोकादिसे प्राप्त होनेवा[ले] [ भोगों ] को सुख माननेवाला विषयरूप विषसे अन्[धा] अज्ञानी पुरुष ही वहाँ—ब्रह्मलोकादिके साधनभूत उ[स] कर्मके प्रति जाता है, विद्वान् नहीं जाता; क्योंकि [वह] उसमें अविद्यादि दोष देखता है; जैसा [कि] बृहदारण्यकोपनिषद्में कहा है—'वे घोर अन्धका[र]से व्याप्त आनन्दशून्य लोक हैं, अविद्वान् और बोध[हीन] पुरुष मरनेके पश्चात् उन्हींमें जाते हैं।'

तथा उस अविद्वान्के ही लिये वेद अर्थजात या[ नी] प्रयोजनोंका निरूपण करते हैं। क्योंकि वे अविद्वा[न्के] लिये ही उनका वर्णन करते हैं, विद्वान्के लिये न[हीं] इसलिये वह विद्वान् इस ब्रह्मलोकादि अनित्य सु[ख] अथवा उसके साधन कर्ममें नहीं आता अर्थात् कर्ममें प्र[वृत्त] नहीं होता। तो फिर क्या करता है? सो बतलाते हैं- वह परमात्माको आत्मस्वरूपसे जानकर परात्मा या[नी] ब्रह्मरूपसे स्थित हुआ ही परमात्माको प्राप्त हो जाता है तथा मार्गके द्वारा अमार्गों—आत्माके लिये संसार[की] प्राप्तिके हेतुभूत धर्माधर्म एवं उपासनारूप विरुद्ध मार्गों-का बाध कर देता है।

अथवा यदि ऐसा पाठ माना जाय—एवं [हि] विद्वानुपयाति तत्र' तो [ इस प्रकार अर्थ होगा—] सगुण ब्रह्मकी उपासना करनेवाला पुरुष वहाँ ब्रह्म-लोकादिमें अपनी उपासनाका फल प्राप्त करता है। त[था] उसके लिये वेद अर्थजातका वर्णन करते हैं। कि[स] प्रकारके अर्थजातका वर्णन करते हैं?—वह इ[स] लोकमें नहीं आता अर्थात् कर्मी पुरुषके समान व[ह] विद्वान् इस लोकमें जन्म नहीं लेता, बल्कि ब्रह्मकी उपासनाके द्वारा वह अमार्ग यानी विरु[द्ध] मार्गोंको नष्ट कर देता है। इस प्रकार वहाँ जाकर व[ह] संसारप्राप्तिके हेतुभूत अमार्गोंको नष्टकर परमात्मस्वरूप[से] स्थित हुआ कालान्तरमें परब्रह्मको प्राप्त हो जाता है— ऐसा इसका तात्पर्य है॥ १८॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



*ईश्वरके जगद्रचनामें प्रवृत्त होनेका प्रयोजन*

एवं तावत्प्रमादाख्यस्याज्ञानस्य मृत्युत्वमप्रमादस्य स्वरूपावस्थानलक्षणस्यामृतत्वम् 'प्रमादं वै मृत्युमहं ब्रवीमि' इत्यादिना दर्शयित्वा 'आस्यादेष निःसरते नाराणाम्' इत्यादिना 'स वै मृत्युस्त्वच्छरीरे य एषः' इत्यन्तेन तस्यैव कार्यात्मना परिणतस्य सर्वानर्थहेतुत्वं प्रदर्शयित्वा, कथमस्य मृत्योर्विनाशः ? इत्याशङ्क्य 'एवं मृत्युं जायमानं विदित्वा ज्ञानेन तिष्ठन्न बिभेति मृत्योः' इत्यात्मज्ञानेन मृत्युविनाशं दर्शयित्वा 'यानेवाहुरिज्यया' इत्यादिना ब्रह्मलोकादेः पुरुषार्थत्वमाशङ्क्य 'एवं ह्यविद्वान्' इत्यादिना तेषामविद्यावद्विषयत्वेनापुरुषार्थत्वमुक्त्वा, 'परं परात्मा प्रयाति मार्गेण' इति ज्ञानमार्गेण मोक्ष उपदिष्टः । तत्र 'परं परात्मा प्रयाति' इति जीवपरयोरेकत्वमुक्तम् । तदसहमानश्चोदयति धृतराष्ट्रः—

इस प्रकार 'प्रमादं वै मृत्युमहं ब्रवीमि' इत्यादि वाक्यसे प्रमादसंज्ञक अज्ञानका मृत्युत्व और स्वरूपावस्थितिरूप अप्रमादका अमृतत्व दिखलाकर 'आस्यादेष निःसरते' इत्यादि वाक्यसे लेकर 'स वै मृत्युस्त्वच्छरीरे य एषः' इस वाक्यतक कार्यरूपमें परिणत हुए उस मृत्युको ही समस्त अनर्थोंका हेतु बता फिर ऐसी आशङ्का करके कि उस मृत्युका विनाश किस प्रकार हो सकता है 'एवं मृत्युं जायमानं विदित्वा ज्ञानेन तिष्ठन्न बिभेति मृत्योः' इस वाक्यद्वारा आत्मज्ञानसे मृत्युका नाश दिखाते हुए फिर 'यानेवाहुरिज्यया' इत्यादिसे ब्रह्मलोकादिके परमपुरुषार्थत्वकी आशङ्का कर 'एवं ह्यविद्वान्' इत्यादि वचनसे अज्ञानी-विषयक होनेसे उनका अपुरुषार्थत्व बतलाकर 'परं परात्मा प्रयाति मार्गेण' इस वाक्यसे ज्ञानमार्गद्वारा मोक्षका उपदेश किया गया । वहाँ 'परं परात्मा प्रयाति' ऐसा कहकर जीव और परमात्माका एकत्व कहा गया है । उसे सहन न कर सकनेके कारण राजा धृतराष्ट्र शङ्का करते हैं—

धृतराष्ट्र उवाच—

कोऽसौ नियुङ्क्ते तमजं पुराणं स चेदिदं सर्वमनुक्रमेण ।
किं वास्य कार्यमथवासुखं च तन्मे विद्वन् ब्रूहि सर्वं यथावत् ॥ १९ ॥

**धृतराष्ट्रने कहा**—यदि क्रमशः वह परमात्मा ही यह सब हो गया है तो उस अजन्मा पुराणपुरुषको नियुक्त कौन करता है ? तथा [ ऐसा करनेमें ] उसका प्रयोजन क्या है और [ ऐसा न करके अपने निष्क्रिय-स्वरूपमें ही स्थित रहनेमें ] उसे दुःख किस बातका है ? हे विद्वन् ! यह सब आप मुझे ठीक-ठीक बतला दीजिये ॥ १९ ॥

ननु यदि स एव सत्यादिलक्षणः परमात्मा क्रमेणाकाशादिधरित्र्यन्तं सृष्ट्वा तदनुप्रविश्यान्नमयाद्यात्मना स्थितः संसरति चेत्, कोऽसौ तं सत्यादिलक्षणमजं पुराणं संसारे नियुङ्क्ते प्रेरयति । किमन्येन, स्वयमेवेति चेत्, किं वास्य नानायोनिषु प्रवर्तमानस्य कार्यं प्रयोजनम् ? अथवा नानायोनिष्वप्रवर्तमानस्य तूष्णींभूतस्य स्वे महिम्नि

यदि आकाशसे लेकर पृथ्वीपर्यन्त क्रमशः सम्पूर्ण जगत्की रचना कर वह सत्य-ज्ञानादिरूप परमात्मा ही उसमें अनुप्रविष्ट हो अन्नमयादि कोशके रूपमें स्थित हुआ जन्म-मरणरूप संसारको प्राप्त हो रहा है तो वह कौन है, जो इस सत्यादिरूप अजन्मा पुराणपुरुषको संसारमें नियुक्त—प्रेरित करता है ? क्या उसे कोई दूसरा प्रेरित करता है ? और यदि वह स्वयं ही इसमें प्रवृत्त होता है तो इन नाना योनियोंमें स्थित हुए उस परमात्माका प्रयोजन क्या है ? अथवा नाना योनियोंमें प्रवृत्त न होकर

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्थितस्य संसाराननुप्रवेशेऽसुखम् अनर्थजातं वा किं भवति ? हे विद्वन् ! मे ब्रूहि सर्वं यथावत् । तथा च ब्रह्मविदामेकः पुण्डरीको भगवान् याज्ञवल्क्यस्तत एव सर्वस्य सृष्टिमुक्त्वा तस्यैव जीवात्मत्वमभ्युपगम्य—'यद्येवं स कथं ब्रह्मन् पापयोनिषु जायते । ईश्वरश्च कथं भावैरनिष्टैः सम्प्रयुज्यते' इति । 'कोऽसौ नियुङ्क्ते' इत्यनेन भगवतोक्तमेव ब्रह्मजीववादपक्षं वावदूकचोद्यं स्वयमेव स्पष्टमुक्तवान् ॥ १९ ॥

चुपचाप अपने स्वरूपमें स्थित रहकर संसारमें अनुप्रवेश न होनेपर उसे क्या दुःख—अनर्थ होता है ? हे विद्वन् ! यह सब मुझे आप ठीक-ठीक बतला दीजिये । तथा ब्रह्मवेत्ताओंमें एक कमलस्वरूप भगवान् याज्ञवल्क्यने सम्पूर्ण जगत्की उत्पत्ति उसीसे बतलाकर उसीका जीवभाव भी स्वीकार कर 'यदि ऐसा है तो हे ब्रह्मन् ! वह पापयोनियोंमें कैसे उत्पन्न होता है ? और समर्थ होकर भी अनिष्ट भावोंसे कैसे युक्त होता है ?' ऐसा कहते हुए, 'कोऽसौ नियुङ्क्ते' इस वाक्यद्वारा जो श्रीमान्‌के कहे हुए ब्रह्म-जीववादपक्षमें वादीकी शङ्का है, उसका स्पष्ट ही उल्लेख किया है ॥ १९ ॥

### जीवसृष्टि अनादि और मायिक है

एवं पृष्टः प्राह भगवान्—

इस प्रकार पूछे जानेपर भगवान् सनत्सुजात बोले-

सनत्सुजात उवाच—

दोषो महानत्र विभेदयोगे ह्यनादियोगेन भवन्ति नित्याः ।
तथास्य नाधिक्यमपैति किंचिदनादियोगेन भवन्ति पुंसः ॥ २० ॥

श्रीसनत्सुजातने कहा—ब्रह्ममें नानात्वका सम्बन्ध स्वीकार करनेमें तो बड़ा भारी दोष है । अनादि मायाके योगसे ही अनेकों अनादि जीव होते हैं । इस प्रकार इस ब्रह्मकी महिमामें भी कोई त्रुटि नहीं आती; क्योंकि अनादि मायाके योगसे ही उस परम पुरुषसे इनकी अभिव्यक्ति होती है ॥ २० ॥

यद्येवं चोदयत एषोऽभिप्रायः—नियोज्यनियोक्तृत्वादिभेददर्शनादेकस्य कूटस्थस्य तदसम्भवाद्भेदेन भवितव्यमिति । तत्र यदि ब्रह्मण एव नानात्वमभ्युपगम्यते चेत्—तदा तस्मिन् भेदयोगे ब्रह्मणो नानात्वयोगे दोषो महान् । को दोषः ? अद्वैतिनो ह्यतथावादिनोऽवैदिका भवेयुः, वेदहृदयं परमार्थमद्वैतं च बाध्यं स्यात् । किं च नानारूपेण परिणतत्वादनित्यादिदोषोऽस्थूलादिवाक्यविरोधश्च प्रसज्येत ।

यदि इस प्रकार शङ्का करनेवालेका यह अभिप्राय है कि नियोज्य-नियोजकत्वादि भेद देखा जाता है और एक कूटस्थमें ऐसा होना सम्भव नहीं है, इसलिये उसमें भेद होना चाहिये तो यदि ब्रह्मका ही नानात्व माना जाय तब तो इस विभेदयोग यानी ब्रह्मके नानात्वयोगमें बड़ा भारी दोष है । वह दोष क्या है ? इससे अद्वैतसिद्धान्तवाले तो मिथ्यावादी और अवैदिक सिद्ध होंगे तथा वेदका रहस्यभूत परमार्थ अद्वैत बाधित हो जायगा । इसके सिवा अनेकरूपसे परिणत हुआ होनेके कारण ब्रह्ममें अनित्यत्वादि दोष आ जायँगे और 'ब्रह्म अस्थूल है' इत्यादि वाक्योंसे विरोध उपस्थित होगा ।

अथोच्यते नास्माभिर्ब्रह्मणो नानात्वमभ्युपगम्यते, अपि तु जीवपरयोर्भेदोऽभ्युपगम्यत इति ।

और यदि यह कहा जाय कि हम ब्रह्मका नानात्व स्वीकार नहीं करते, अपितु जीव और ब्रह्मका ही भेद

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2


अत्रापि महान् दोषः, यतो विनाशं प्राप्नोति। श्रूयते च—'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति', 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति', 'अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः', 'अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति', 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद' इति।

मानते हैं तो ऐसी अवस्थामें भी महान् दोष है, जिससे कि नाशकी प्राप्ति होती है। श्रुति भी कहती है—'जब कि यह ( जीव ) इस ( ब्रह्म ) में थोड़ा-सा भी भेद करता है, तब उसे भय प्राप्त होता है', 'जो इसमें नानावत् देखता है, वह मृत्युसे मृत्युको प्राप्त होता है' और 'जो किसी अन्य देवताको, यह अन्य है और मैं अन्य हूँ—ऐसी बुद्धि रखकर उपासना करता है, वह नहीं जानता, जैसे कि पशु।' 'जो इससे भिन्न जानते हैं, वे अन्य स्वामीके अधीन होते हैं और क्षयशील लोकोंको प्राप्त होते हैं।' 'जो सबको आत्मासे भिन्न जानता है, उसका सब तिरस्कार कर देते हैं' इत्यादि।

अथवा, जीवपरयोर्भेदेऽभ्युपगम्यमाने 'तत्त्वमसि', 'अहं ब्रह्मास्मि', 'अयमात्मा ब्रह्म', 'यत्साक्षादपरोक्षाद्ब्रह्म', 'य आत्मा सर्वान्तरः', 'एष त आत्मान्तर्याम्यमृतः', 'अयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वम्', 'इदं सर्वं यदयमात्मा,' 'एष त आत्मा सर्वान्तरः', 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि', 'स वा एष महानज आत्माजरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं वै ब्रह्मेति' इत्येवमादिश्रुतिस्मृतीतिहासपुराणविरुद्धभाषितत्वादवैदिकत्वं नाम महान् दोषो भवति।

तथा जीव और ब्रह्मका भेद माननेपर तो 'तू वह ( ब्रह्म ) है', 'मैं ब्रह्म हूँ', 'यह आत्मा ब्रह्म है', 'जो साक्षात् अपरोक्षरूपसे ब्रह्म है', 'जो सबका अन्तर्यामी आत्मा है', 'यह तेरा अन्तर्यामी अमृतस्वरूप आत्मा है', 'यह जो आत्मा है यही वह है, यह अमृत है, यह ब्रह्म है और यही सब कुछ है', 'यह जो आत्मा है, यही सब कुछ है', 'यह तेरा आत्मा सबसे अन्तरतम है', 'हे भगवन्! हे देव! तुम ही मैं हूँ और मैं ही तुम हो' तथा 'वह यह महान् अजन्मा आत्मा जराशून्य, अमर और अभय है; अभय ही ब्रह्म है, अभय ही ब्रह्म है' इत्यादि ऐसे ही श्रुति-स्मृति, इतिहास एवं पुराणवाक्योंके विरुद्ध कहे जानेके कारण इसमें अवैदिकत्वरूप महान् दोष आता है।

कथं तर्हि त्वत्पक्षे जीवेश्वरादिव्यवहारभेदः? कथं वा तेषां नित्यत्वमिति?

तो फिर तुम्हारे पक्षमें जीव-ईश्वर आदि व्यवहारका भेद किस प्रकार सिद्ध होगा? और किस प्रकार उनकी नित्यता सिद्ध होगी?

तत्राह—'अनादियोगेन भवन्ति नित्याः' इति। अनादिरविद्याख्या माया। तथा चोक्तं भगवता—'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि' इति। 'इयं हि साक्षाज्जगतो योनिरेका सर्वात्मिका सर्वनियामिका च। माहेश्वरी शक्तिरनादिसिद्धा व्योमाभिधाना दिवि राजतीव॥' इति च।

इसके उत्तरमें कहते हैं—'अनादिके योगसे ही अनादि होते हैं।' 'अनादि' अविद्यासंज्ञक मायाका नाम है; जैसा कि भगवान्ने भी कहा है—'प्रकृति और पुरुष—इन दोनोंको ही अनादि जानो।' तथा ऐसा भी वाक्य है—'यह आकाश नामवाली अनादिसिद्धा श्रीमहेश्वरकी शक्ति ही, जो कि मानो दिव्यलोकमें विराजमान है, इस जगत्की साक्षात् योनि है तथा यह एक होते हुए भी सर्वमयी और सबकी नियामिका है।'


RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2


तद्योगेन अनादिमायायोगेन भवन्ति जीवादयो नित्याः, अद्वितीयस्यापि परमात्मनो मायया बहुरूपत्वमुपपद्यत एवेत्यर्थः । श्रूयते च एकस्यैव बहुरूपत्वम्— 'रूपं रूपं प्रतिरूपो बभूव', 'इन्द्रो मायाभिः पुरुरूप ईयते', 'एको देवः सर्वभूतेषु गूढः', 'एकं सद्विप्रा बहुधा वदन्ति', 'एकं सन्तं बहुधा कल्पयन्ति', 'एको देवो बहुधा निविष्टः', 'एकः सन् बहुधा विचारः', 'त्वमेकोऽसि बहूननुप्रविष्टः', 'अजायमानो बहुधा विजायते' इति ।

तथा च मोक्षधर्मे—

एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ इति ।

तथा च याज्ञवल्क्यः—

आकाशमेकं हि यथा घटादिषु पृथग् भवेत् ।
तथात्मैकोऽप्यनेकश्च जलाधारेष्विवांशुमान् ॥ इति ।

तथा च कावषेयगीतासु—

एकश्च सूर्यो बहुधा जलाधारेषु दृश्यते ।
आभाति परमात्मापि सर्वोपाधिषु संस्थितः ॥
ब्रह्म सर्वशरीरेषु बाह्ये चाभ्यन्तरे स्थितम् ।
आकाशमिव कुम्भेषु बुद्धिगम्यो न चान्यथा ॥ इति ।

तथा चाह परमेश्वरः—

नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः ।
एकः सन् भिद्यते शक्त्या मायया सर्वभावतः ॥ इति

यस्मादेकस्यैव मायया बहुरूपत्वं तस्मात्स एव कारणात्मा परमेश्वरः कार्यात्मानं जीवात्मानं नियुङ्क्ते कृतप्रयत्नापेक्षः सन् मायया, न परमार्थतः

उसके योगसे अर्थात् उस अनादि मायाके [योगसे] जीवादि भी नित्य हैं । तात्पर्य यह है कि अद्वि[तीय] होनेपर भी मायावश परमात्माका अनेकरूप होना सम्भ[व] ही । 'वह रूप-रूपमें उनके अनुरूप हो गया है', 'मा[यासे] इन्द्र अनेक रूपमें चेष्टा करता है', 'समस्त भूतोंमें [एक] ही देव छिपा हुआ है', 'एक होते हुए भी ब्राह्मण [उसे] अनेक प्रकारसे कहते हैं', 'एक होनेपर भी उसकी अ[नेक] प्रकारसे कल्पना करते हैं', 'एक ही देवमें [अनेक] प्रकारका अभिनिवेश हो रहा है', 'एक होते हु[ए] वह अनेक रूपसे चेष्टा करता है', 'तू एक ही बहु[तोंमें] अनुप्रविष्ट हो रहा है' तथा 'वह बिना उत्पन्न हुए अनेक रूपमें उत्पन्न होता है' इत्यादि मन्त्रोंसे भी एक आत्माका मायासे अनेक रूप होना सुना जाता है ।

ऐसा ही मोक्षधर्ममें भी कहा है—'प्राणी-प्राणीमें [एक] ही भूतात्मा स्थित है । जलमें प्रतिबिम्बित चन्द्र[माके] समान वही [ बिम्बरूपसे ] एक और [ प्रतिबिम्बरूप[से] ] अनेक रूपोंमें दिखायी दे रहा है ।' तथा याज्ञवल्क्य भी कहते हैं—'जिस प्रकार एक ही आकाश घटादि[में] विभिन्न-सा हो जाता है, उसी प्रकार आत्मा एक होने[-]पर भी जलके पात्रोंमें ( प्रतिबिम्बित ) सूर्यके सम[ान] अनेक प्रतीत हो रहा है ।' तथा कावषेयगीतामें क[हा] है—'सूर्य एक ही है, किंतु वह जलके पात्रोंमें अनेक[-] वत् देखा जाता है । उसी प्रकार सम्पूर्ण उपाधियोंमें स्थि[त] परमात्मा भी ( अनेकवत् ) प्रतीत होता है । ब्रह्म सम्पू[र्ण] शरीरोंके भीतर और बाहर भी स्थित है; किंतु व[ह] घटोंमें स्थित आकाशके समान ही बुद्धिका विषय हो[ता] है, और किसी प्रकार नहीं ।' इसी तरह भगवान् प[र]मेश्वरने भी कहा है—'आत्मा नित्य, सर्वगत, कूटस्थ और सब प्रकारके दोषोंसे रहित है । वह एक होने[पर] भी मायावश अपने सम्पूर्ण भावोंकी दृष्टिसे शक्ति[से] विभिन्न है ।'

